# Mahaganapati Sahasranama Stotram 1

# મહાગણપતિસહસ્રનામસ્તોત્રમ્ ૧

## Document Information

Text title : Ganesha Sahasranama Stotram

File name : ganesha1000.itx

Category : sahasranAma, ganesha, stotra, gaNeshapurANa

Location : doc_ganesha

Author : Traditional

Transliterated by : M. Suresh msuresh at altavista.net

Proofread by : M. Suresh, Kirk Wortman, Preeti Bhandare

Description-comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDa | adhyAya 46 | 1.46 1-223|| See corresponding nAmAvaliH as gaNapatisahasranAmAvalI mahAgaNapatisahasranAmAvaliH 1

Latest update : February 28, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 28, 2025

*sanskritdocuments.org*

# મહાગણપતિસહસ્રનામસ્તોત્રમ્ ૧

શ્રીમદ્ગણેશદિવ્યસહસ્રનામામૃતસ્તોત્રં
। મુનિરુવાચ ।
કથં નામ્નાં સહસ્રં તં ગણેશ ઉપદિષ્ટવાન્ ।
શિવદં તન્મમાચક્ષ્વ લોકાનુગ્રહતત્પર ॥ ૧॥
। બ્રહ્મોવાચ ।
દેવઃ પૂર્વં પુરારાતિઃ પુરત્રયજયોદ્યમે ।
અનર્ચનાદ્ગણેશસ્ય જાતો વિઘ્નાકુલઃ કિલ ॥ ૨॥
મનસા સ વિનિર્ધાર્ય દદૃશે વિઘ્નકારણમ્ ।
મહાગણપતિં ભક્ત્યા સમભ્યર્ચ્ય યથાવિધિ ॥ ૩॥
વિઘ્નપ્રશમનોપાયમપૃચ્છદપરિશ્રમમ્ ।
સન્તુષ્ટઃ પૂજયા શમ્ભોર્મહાગણપતિઃ સ્વયમ્ ॥ ૪॥
સર્વવિઘ્નપ્રશમનં સર્વકામફલપ્રદમ્ ।
તતસ્તસ્મૈ સ્વયં નામ્નાં સહસ્રમિદમબ્રવીત્ ॥ ૫॥
અસ્ય શ્રીમહાગણપતિસહસ્રનામસ્તોત્રમાલામન્ત્રસ્ય ।
ગણેશઋષિઃ । મહાગણપતિર્દેવતા । નાનાવિધાનિચ્છન્દાંસિ ।
હુમિતિ બીજમ્ । તુઙ્ગમિતિ શક્તિઃ । સ્વાહાશક્તિરિતિ કીલકમ્ ॥
(variation ગમિતિ બીજમ્ । તુણ્ડમિતી શક્તિઃ । સ્વાહા કીલકમ્ ।)
સકલવિઘ્નવિનાશનદ્વારા શ્રીમહાગણપતિપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥
(શ્રીમહાગણપતિપ્રીત્યર્થે)
અથ કરન્યાસઃ ।
ગણેશ્વરો ગણક્રીડ ઇત્યઙ્ગુષ્ઠાભ્યાં નમઃ ।
કુમારગુરુરીશાન ઇતિ તર્જનીભ્યાં નમઃ ॥ ૧॥
બ્રહ્માણ્ડકુમ્ભશ્ચિદ્વ્યોમેતિ મધ્યમાભ્યાં નમઃ ।
રક્તો રક્તામ્બરધર ઇત્યનામિકાભ્યાં નમઃ ॥ ૨॥
સર્વસદ્ગુરુસંસેવ્ય ઇતિ કનિષ્ઠિકાભ્યાં નમઃ ।

લુપ્તવિઘ્નઃ સ્વભક્તાનામિતિ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥ ૩॥
અથ હૃદયાદિન્યાસઃ ।
છન્દશ્છન્દોદ્ભવ ઇતિ હૃદયાય નમઃ ।
નિષ્કલો નિર્મલ ઇતિ શિરસે સ્વાહા ।
સૃષ્ટિસ્થિતિલયક્રીડ ઇતિ શિખાયૈ વષટ્ ।
જ્ઞાનં વિજ્ઞાનમાનન્દ ઇતિ કવચાય હુમ્ ।
અષ્ટાઙ્ગયોગફલભૃદિતિ નેત્રત્રયાય વૌષટ્ ।
અનન્તશક્તિસહિત ઇત્યસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃ સ્વરોમ્ ઇતિ દિગ્બન્ધઃ ॥
અથ ધ્યાનમ્ ।
ગજવદનમચિન્ત્યં તીક્ષ્ણદંષ્ટ્રં ત્રિનેત્રં
બૃહદુદરમશેષં ભૂતિરાજં પુરાણમ્ ।
અમરવરસુપૂજ્યં રક્તવર્ણં સુરેશં
પશુપતિસુતમીશં વિઘ્નરાજં નમામિ ॥ ૧॥
રક્તામ્ભોધિસ્થપોતોલ્લસદરુણસરોજાધિરુઢં ત્રિનેત્રં
પાશં ચૈવાઙ્કુશાખ્યં પરશુમભયદં બાહુભિર્ધારયન્તમ્ ।
શક્ત્યા યુક્તં ગજાસ્યં પૃથુતરજઠરં સિદ્ધિબુદ્ધીસમેતં
રક્તં ચન્દ્રાર્ધમૌલિં સકલભયહરં વિઘ્નરાજં નમામિ ॥ ૨॥
શ્રીસિદ્ધિબુદ્ધિસહિતાય સલક્ષલાભાય શ્રીસ્વાનન્દેશાય બ્રહ્મણસ્પતયે
સાઙ્ગાય સપરિવારાય સશક્તિકાય સાયુધાય સવાહનાય સાવરણાય નમઃ ।
ઇતિ નામમન્ત્રેણ માનસૈઃ પઞ્ચોપચારૈઃ સમ્પૂજ્ય પઠેત્ ।

શ્રીમહાગણપતિરુવાચ ।
ૐ ગણેશ્વરો ગણક્રીડો ગણનાથો ગણાધિપઃ ।
એકદન્તો વક્રતુણ્ડો ગજવક્ત્રો મહોદરઃ ॥ ૧॥
લમ્બોદરો ધૂમ્રવર્ણો વિકટો વિઘ્નનાશનઃ ।
સુમુખો દુર્મુખો બુદ્ધો વિઘ્નરાજો ગજાનનઃ ॥ ૨॥
ભીમઃ પ્રમોદ આમોદઃ સુરાનન્દો મદોત્કટઃ ।
હેરમ્બઃ શમ્બરઃ શમ્ભુર્લમ્બકર્ણો મહાબલઃ ॥ ૩॥
નન્દનોઽલમ્પટોઽભીરુર્મેઘનાદો ગણઞ્જયઃ ।
વિનાયકો વિરૂપાક્ષો વીરઃ શૂરવરપ્રદઃ ॥ ૪॥
મહાગણપતિર્બુદ્ધિપ્રિયઃ ક્ષિપ્રપ્રસાદનઃ ।

રુદ્રપ્રિયો ગણાધ્યક્ષ ઉમાપુત્રોઽઘનાશનઃ ॥ ૫॥
કુમારગુરુરીશાનપુત્રો મૂષકવાહનઃ ।
સિદ્ધિપ્રિયઃ સિદ્ધિપતિઃ સિદ્ધઃ સિદ્ધિવિનાયકઃ ॥ ૬॥
અવિઘ્નસ્તુમ્બુરુઃ સિંહવાહનો મોહિનીપ્રિયઃ ।
કટઙ્કટો રાજપુત્રઃ શાકલઃ સંમિતોઽમિતઃ ॥ ૭॥
કૂષ્માણ્ડસામસમ્ભૂતિર્દુર્જયો ધૂર્જયો જયઃ ।
ભૂપતિર્ભુવનપતિર્ભૂતાનાં પતિરવ્યયઃ ॥ ૮॥
વિશ્વકર્તા વિશ્વમુખો વિશ્વરૂપો નિધિર્ગુણઃ ।
કવિઃ કવીનામૃષભો બ્રહ્મણ્યો બ્રહ્મવિત્પ્રિયઃ ॥ ૯॥
જ્યેષ્ઠરાજો નિધિપતિર્નિધિપ્રિયપતિપ્રિયઃ ।
હિરણ્મયપુરાન્તઃસ્થઃ સૂર્યમણ્ડલમધ્યગઃ ॥ ૧૦॥
કરાહતિધ્વસ્તસિન્ધુસલિલઃ પૂષદન્તભિત્ ।
ઉમાઙ્કકેલિકુતુકી મુક્તિદઃ કુલપાવનઃ ॥ ૧૧॥
કિરીટી કુણ્ડલી હારી વનમાલી મનોમયઃ ।
વૈમુખ્યહતદૈત્યશ્રીઃ પાદાહતિજિતક્ષિતિઃ ॥ ૧૨॥
સદ્યોજાતઃ સ્વર્ણમુઞ્જમેખલી દુર્નિમિત્તહૃત્ ।
દુઃસ્વપ્નહૃત્પ્રસહનો ગુણી નાદપ્રતિષ્ઠિતઃ ॥ ૧૩॥
સુરૂપઃ સર્વનેત્રાધિવાસો વીરાસનાશ્રયઃ ।
પીતામ્બરઃ ખણ્ડરદઃ ખણ્ડવૈશાખસંસ્થિતઃ ॥ ૧૪॥
ચિત્રાઙ્ગઃ શ્યામદશનો ભાલચન્દ્રો હવિર્ભુજઃ ।
યોગાધિપસ્તારકસ્થઃ પુરુષો ગજકર્ણકઃ ॥ ૧૫॥
ગણાધિરાજો વિજયઃ સ્થિરો ગજપતિર્ધ્વજી ।
દેવદેવઃ સ્મરઃ પ્રાણદીપકો વાયુકીલકઃ ॥ ૧૬॥
વિપશ્ચિદ્વરદો નાદો નાદભિન્નમહાચલઃ ।
વરાહરદનો મૃત્યુઞ્જયો વ્યાઘ્રાજિનામ્બરઃ ॥ ૧૭॥
ઇચ્છાશક્તિભવો દેવત્રાતા દૈત્યવિમર્દનઃ ।
શમ્ભુવક્ત્રોદ્ભવઃ શમ્ભુકોપહા શમ્ભુહાસ્યભૂઃ ॥ ૧૮॥
શમ્ભુતેજાઃ શિવાશોકહારી ગૌરીસુખાવહઃ ।
ઉમાઙ્ગમલજો ગૌરીતેજોભૂઃ સ્વર્ધુનીભવઃ ॥ ૧૯॥
યજ્ઞકાયો મહાનાદો ગિરિવર્ષ્મા શુભાનનઃ ।
સર્વાત્મા સર્વદેવાત્મા બ્રહ્મમૂર્ધા કકુપ્શ્રુતિઃ ॥ ૨૦॥
બ્રહ્માણ્ડકુમ્ભશ્ચિદ્વ્યોમભાલઃસત્યશિરોરુહઃ ।

જગજ્જન્મલયોન્મેષનિમેષોઽગ્ન્યર્કસોમદૃક્ ॥ ૨૧॥
ગિરીન્દ્રૈકરદો ધર્માધર્મોષ્ઠઃ સામબૃંહિતઃ ।
ગ્રહર્ક્ષદશનો વાણીજિહ્વો વાસવનાસિકઃ ॥ ૨૨॥
ભ્રૂમધ્યસંસ્થિતકરો બ્રહ્મવિદ્યામદોદકઃ ।
કુલાચલાંસઃ સોમાર્કઘણ્ટો રુદ્રશિરોધરઃ ॥ ૨૩॥
નદીનદભુજઃ સર્પાઙ્ગુલીકસ્તારકાનખઃ ।
વ્યોમનાભિઃ શ્રીહૃદયો મેરુપૃષ્ઠોઽર્ણવોદરઃ ॥ ૨૪॥
કુક્ષિસ્થયક્ષગન્ધર્વરક્ષઃકિન્નરમાનુષઃ ।
પૃથ્વીકટિઃ સૃષ્ટિલિઙ્ગઃ શૈલોરુર્દસ્રજાનુકઃ ॥ ૨૫॥
પાતાલજઙ્ઘો મુનિપાત્કાલાઙ્ગુષ્ઠસ્ત્રયીતનુઃ ।
જ્યોતિર્મણ્ડલલાઙ્ગૂલો હૃદયાલાનનિશ્ચલઃ ॥ ૨૬॥
હૃત્પદ્મકર્ણિકાશાલી વિયત્કેલિસરોવરઃ ।
સદ્ભક્તધ્યાનનિગડઃ પૂજાવારિનિવારિતઃ ॥ ૨૭॥
પ્રતાપી કાશ્યપો મન્તા ગણકો વિષ્ટપી બલી ।
યશસ્વી ધાર્મિકો જેતા પ્રથમઃ પ્રમથેશ્વરઃ ॥ ૨૮॥
ચિન્તામણિર્દ્વીપપતિઃ કલ્પદ્રુમવનાલયઃ ।
રત્નમણ્ડપમધ્યસ્થો રત્નસિંહાસનાશ્રયઃ ॥ ૨૯॥
તીવ્રાશિરોદ્ધૃતપદો જ્વાલિનીમૌલિલાલિતઃ ।
નન્દાનન્દિતપીઠશ્રીર્ભોગદો ભૂષિતાસનઃ ॥ ૩૦॥
સકામદાયિનીપીઠઃ સ્ફુરદુગ્રાસનાશ્રયઃ ।
તેજોવતીશિરોરત્નં સત્યાનિત્યાવતંસિતઃ ॥ ૩૧॥
સવિઘ્નનાશિનીપીઠઃ સર્વશક્ત્યમ્બુજાલયઃ ।
લિપિપદ્માસનાધારો વહ્નિધામત્રયાલયઃ ॥ ૩૨॥
ઉન્નતપ્રપદો ગૂઢગુલ્ફઃ સંવૃતપાર્ષ્ણિકઃ ।
પીનજઙ્ઘઃ શ્લિષ્ટજાનુઃ સ્થૂલોરુઃ પ્રોન્નમત્કટિઃ ॥ ૩૩॥
નિમ્નનાભિઃ સ્થૂલકુક્ષિઃ પીનવક્ષા બૃહદ્ભુજઃ ।
પીનસ્કન્ધઃ કમ્બુકણ્ઠો લમ્બોષ્ઠો લમ્બનાસિકઃ ॥ ૩૪॥
ભગ્નવામરદસ્તુઙ્ગસવ્યદન્તો મહાહનુઃ ।
હ્રસ્વનેત્રત્રયઃ શૂર્પકર્ણો નિબિડમસ્તકઃ ॥ ૩૫॥
સ્તબકાકારકુમ્ભાગ્રો રત્નમૌલિર્નિરઙ્કુશઃ ।
સર્પહારકટીસૂત્રઃ સર્પયજ્ઞોપવીતવાન્ ॥ ૩૬॥
સર્પકોટીરકટકઃ સર્પગ્રૈવેયકાઙ્ગદઃ ।

સર્પકક્ષોદરાબન્ધઃ સર્પરાજોત્તરચ્છદઃ ॥ ૩૭॥
રક્તો રક્તામ્બરધરો રક્તમાલાવિભૂષણઃ ।
રક્તેક્ષણો રક્તકરો રક્તતાલ્વોષ્ઠપલ્લવઃ ॥ ૩૮॥
શ્વેતઃ શ્વેતામ્બરધરઃ શ્વેતમાલાવિભૂષણઃ ।
શ્વેતાતપત્રરુચિરઃ શ્વેતચામરવીજિતઃ ॥ ૩૯॥
સર્વાવયવસમ્પૂર્ણઃ સર્વલક્ષણલક્ષિતઃ ।
સર્વાભરણશોભાઢ્યઃ સર્વશોભાસમન્વિતઃ ॥ ૪૦॥
સર્વમઙ્ગલમાઙ્ગલ્યઃ સર્વકારણકારણમ્ ।
સર્વદેવવરઃ શાર્ઙ્ગી બીજપૂરી ગદાધરઃ ॥ ૪૧॥
શુભાઙ્ગો લોકસારઙ્ગઃ સુતન્તુસ્તન્તુવર્ધનઃ ।
કિરીટી કુણ્ડલી હારી વનમાલી શુભાઙ્ગદઃ ॥ ૪૨॥
ઇક્ષુચાપધરઃ શૂલી ચક્રપાણિઃ સરોજભૃત્ ।
પાશી ધૃતોત્પલઃ શાલિમઞ્જરીભૃત્સ્વદન્તભૃત્ ॥ ૪૩॥
કલ્પવલ્લીધરો વિશ્વાભયદૈકકરો વશી ।
અક્ષમાલાધરો જ્ઞાનમુદ્રાવાન્ મુદ્ગરાયુધઃ ॥ ૪૪॥
પૂર્ણપાત્રી કમ્બુધરો વિધૃતાઙ્કુશમૂલકઃ ।
કરસ્થામ્રફલશ્ચૂતકલિકાભૃત્કુઠારવાન્ ॥ ૪૫॥
પુષ્કરસ્થસ્વર્ણઘટીપૂર્ણરત્નાભિવર્ષકઃ ।
ભારતીસુન્દરીનાથો વિનાયકરતિપ્રિયઃ ॥ ૪૬॥
મહાલક્ષ્મીપ્રિયતમઃ સિદ્ધલક્ષ્મીમનોરમઃ ।
રમારમેશપૂર્વાઙ્ગો દક્ષિણોમામહેશ્વરઃ ॥ ૪૭॥
મહીવરાહવામાઙ્ગો રતિકન્દર્પપશ્ચિમઃ ।
આમોદમોદજનનઃ સમ્પ્રમોદપ્રમોદનઃ ॥ ૪૮॥
સંવર્ધિતમહાવૃદ્ધિરૃદ્ધિસિદ્ધિપ્રવર્ધનઃ ।
દન્તસૌમુખ્યસુમુખઃ કાન્તિકન્દલિતાશ્રયઃ ॥ ૪૯॥
મદનાવત્યાશ્રિતાઙ્ઘ્રિઃ કૃતવૈમુખ્યદુર્મુખઃ ।
વિઘ્નસમ્પલ્લવઃ પદ્મઃ સર્વોન્નતમદદ્રવઃ ॥ ૫૦॥
વિઘ્નકૃન્નિમ્નચરણો દ્રાવિણીશક્તિસત્કૃતઃ ।
તીવ્રાપ્રસન્નનયનો જ્વાલિનીપાલિતૈકદૃક્ ॥ ૫૧॥
મોહિનીમોહનો ભોગદાયિનીકાન્તિમણ્ડનઃ ।
કામિનીકાન્તવક્ત્રશ્રીરધિષ્ઠિતવસુન્ધરઃ ॥ ૫૨॥
વસુધારામદોન્નાદો મહાશઙ્ખનિધિપ્રિયઃ ।

નમદ્વસુમતીમાલી મહાપદ્મનિધિઃ પ્રભુઃ ॥ ૫૩॥
સર્વસદ્ગુરુસંસેવ્યઃ શોચિષ્કેશહૃદાશ્રયઃ ।
ઈશાનમૂર્ધા દેવેન્દ્રશિખઃ પવનનન્દનઃ ॥ ૫૪॥
પ્રત્યુગ્રનયનો દિવ્યો દિવ્યાસ્ત્રશતપર્વધૃક્ ।
ઐરાવતાદિસર્વાશાવારણો વારણપ્રિયઃ ॥ ૫૫॥
વજ્રાદ્યસ્ત્રપરીવારો ગણચણ્ડસમાશ્રયઃ ।
જયાજયપરિકરો વિજયાવિજયાવહઃ ॥ ૫૬॥
અજયાર્ચિતપાદાબ્જો નિત્યાનન્દવનસ્થિતઃ ।
વિલાસિનીકૃતોલ્લાસઃ શૌણ્ડી સૌન્દર્યમણ્ડિતઃ ॥ ૫૭॥
અનન્તાનન્તસુખદઃ સુમઙ્ગલસુમઙ્ગલઃ ।
જ્ઞાનાશ્રયઃ ક્રિયાધાર ઇચ્છાશક્તિનિષેવિતઃ ॥ ૫૮॥
સુભગાસંશ્રિતપદો લલિતાલલિતાશ્રયઃ ।
કામિનીપાલનઃ કામકામિનીકેલિલાલિતઃ ॥ ૫૯॥ (કામિનીકામનઃ)

સરસ્વત્યાશ્રયો ગૌરીનન્દનઃ શ્રીનિકેતનઃ ।
ગુરુગુપ્તપદો વાચાસિદ્ધો વાગીશ્વરીપતિઃ ॥ ૬૦॥
નલિનીકામુકો વામારામો જ્યેષ્ઠામનોરમઃ ।
રૌદ્રીમુદ્રિતપાદાબ્જો હુમ્બીજસ્તુઙ્ગશક્તિકઃ ॥ ૬૧॥
વિશ્વાદિજનનત્રાણઃ સ્વાહાશક્તિઃ સકીલકઃ ।
અમૃતાબ્ધિકૃતાવાસો મદઘૂર્ણિતલોચનઃ ॥ ૬૨॥
ઉચ્છિષ્ટોચ્છિષ્ટગણકો ગણેશો ગણનાયકઃ ।
સાર્વકાલિકસંસિદ્ધિર્નિત્યસેવ્યો દિગમ્બરઃ ॥ ૬૩॥
અનાપાયોઽનન્તદૃષ્ટિરપ્રમેયોઽજરામરઃ । mAtRikA prefix names
અનાવિલોઽપ્રતિહતિરચ્યુતોઽમૃતમક્ષરઃ ॥ ૬૪॥
અપ્રતર્ક્યોઽક્ષયોઽજય્યોઽનાધારોઽનામયોઽમલઃ ।
અમેયસિદ્ધિરદ્વૈતમઘોરોઽગ્નિસમાનનઃ ॥ ૬૫॥ (અમોઘસિદ્ધિ)

અનાકારોઽબ્ધિભૂમ્યગ્નિબલઘ્નોઽવ્યક્તલક્ષણઃ ।
આધારપીઠમાધાર આધારાધેયવર્જિતઃ ॥ ૬૬॥
આખુકેતન આશાપૂરક આખુમહારથઃ ।
ઇક્ષુસાગરમધ્યસ્થ ઇક્ષુભક્ષણલાલસઃ ॥ ૬૭॥
ઇક્ષુચાપાતિરેકશ્રીરિક્ષુચાપનિષેવિતઃ ।
ઇન્દ્રગોપસમાનશ્રીરિન્દ્રનીલસમદ્યુતિઃ ॥ ૬૮॥

ઇન્દીવરદલશ્યામ ઇન્દુમણ્ડલમણ્ડિતઃ ।
ઇધ્મપ્રિય ઇડાભાગ ઇડાવાનિન્દિરાપ્રિયઃ ॥ ૬૯॥
ઇક્ષ્વાકુવિઘ્નવિધ્વંસી ઇતિકર્તવ્યતેપ્સિતઃ ।
ઈશાનમૌલિરીશાન ઈશાનપ્રિય ઈતિહા ॥ ૭૦॥
ઈષણાત્રયકલ્પાન્ત ઈહામાત્રવિવર્જિતઃ । (ઇહામાત્રવિવર્જિતઃ)
ઉપેન્દ્ર ઉડુભૃન્મૌલિરુડુનાથકરપ્રિયઃ ॥ ૭૧॥
ઉન્નતાનન ઉત્તુઙ્ગ ઉદારસ્ત્રિદશાગ્રણીઃ ।
ઊર્જસ્વાનૂષ્મલમદ ઊહાપોહદુરાસદઃ ॥ ૭૨॥
ઋગ્યજુઃસામનયન ઋદ્ધિસિદ્ધિસમર્પકઃ ।
ઋજુચિત્તૈકસુલભો ઋણત્રયવિમોચનઃ ॥ ૭૩॥
લુપ્તવિઘ્નઃ સ્વભક્તાનાં લુપ્તશક્તિઃ સુરદ્વિષામ્ ।
લુપ્તશ્રીર્વિમુખાર્ચાનાં લૂતાવિસ્ફોટનાશનઃ ॥ ૭૪॥
એકારપીઠમધ્યસ્થ એકપાદકૃતાસનઃ ।
એજિતાખિલદૈત્યશ્રીરેધિતાખિલસંશ્રયઃ ॥ ૭૫॥
ઐશ્વર્યનિધિરૈશ્વર્યમૈહિકામુષ્મિકપ્રદઃ ।
ઐરંમદસમોન્મેષ ઐરાવતસમાનનઃ ॥ ૭૬॥
ઓંકારવાચ્ય ઓંકાર ઓજસ્વાનોષધીપતિઃ ।
ઔદાર્યનિધિરૌદ્ધત્યધૈર્ય ઔન્નત્યનિઃસમઃ ॥ ૭૭॥
અઙ્કુશઃ સુરનાગાનામઙ્કુશાકારસંસ્થિતઃ ।
અઃ સમસ્તવિસર્ગાન્તપદેષુ પરિકીર્તિતઃ ॥ ૭૮॥
કમણ્ડલુધરઃ કલ્પઃ કપર્દી કલભાનનઃ ।
કર્મસાક્ષી કર્મકર્તા કર્માકર્મફલપ્રદઃ ॥ ૭૯॥
કદમ્બગોલકાકારઃ કૂષ્માણ્ડગણનાયકઃ ।
કારુણ્યદેહઃ કપિલઃ કથકઃ કટિસૂત્રભૃત્ ॥ ૮૦॥
ખર્વઃ ખડ્ગપ્રિયઃ ખડ્ગઃ ખાન્તાન્તઃસ્થઃ ખનિર્મલઃ ।
ખલ્વાટશૃઙ્ગનિલયઃ ખટ્વાઙ્ગી ખદુરાસદઃ ॥ ૮૧॥
ગુણાઢ્યો ગહનો ગદ્યો ગદ્યપદ્યસુધાર્ણવઃ ।
ગદ્યગાનપ્રિયો ગર્જો ગીતગીર્વાણપૂર્વજઃ ॥ ૮૨॥
ગુહ્યાચારરતો ગુહ્યો ગુહ્યાગમનિરૂપિતઃ ।
ગુહાશયો ગુડાબ્ધિસ્થો ગુરુગમ્યો ગુરુર્ગુરુઃ ॥ ૮૩॥
ઘણ્ટાઘર્ઘરિકામાલી ઘટકુમ્ભો ઘટોદરઃ ।
ઙકારવાચ્યો ઙાકારો ઙકારાકારશુણ્ડભૃત્ ॥ ૮૪॥

ચણ્ડશ્ચણ્ડેશ્વરશ્ચણ્ડી ચણ્ડેશશ્ચણ્ડવિક્રમઃ ।
ચરાચરપિતા ચિન્તામણિશ્ચર્વણલાલસઃ ॥ ૮૫॥
છન્દશ્છન્દોદ્ભવશ્છન્દો દુર્લક્ષ્યશ્છન્દવિગ્રહઃ ।
જગદ્યોનિર્જગત્સાક્ષી જગદીશો જગન્મયઃ ॥ ૮૬॥
જપ્યો જપપરો જાપ્યો જિહ્વાસિંહાસનપ્રભુઃ ।
સ્રવદ્ગણ્ડોલ્લસદ્ધાનઝઙ્કારિભ્રમરાકુલઃ ॥ ૮૭॥
ટઙ્કારસ્ફારસંરાવષ્ટઙ્કારમણિનૂપુરઃ ।
ઠદ્વયીપલ્લવાન્તસ્થસર્વમન્ત્રેષુ સિદ્ધિદઃ ॥ ૮૮॥
ડિણ્ડિમુણ્ડો ડાકિનીશો ડામરો ડિણ્ડિમપ્રિયઃ ।
ઢક્કાનિનાદમુદિતો ઢૌઙ્કો ઢુણ્ઢિવિનાયકઃ ॥ ૮૯॥ (ઢૌઙ્ગો)

તત્ત્વાનાં પ્રકૃતિસ્તત્ત્વં તત્ત્વમ્પદનિરૂપિતઃ ।
તારકાન્તરસંસ્થાનસ્તારકસ્તારકાન્તકઃ ॥ ૯૦॥
સ્થાણુઃ સ્થાણુપ્રિયઃ સ્થાતા સ્થાવરં જઙ્ગમં જગત્ ।
દક્ષયજ્ઞપ્રમથનો દાતા દાનં દમો દયા ॥ ૯૧॥
દયાવાન્દિવ્યવિભવો દણ્ડભૃદ્દણ્ડનાયકઃ ।
દન્તપ્રભિન્નાભ્રમાલો દૈત્યવારણદારણઃ ॥ ૯૨॥
દંષ્ટ્રાલગ્નદ્વીપઘટો દેવાર્થનૃગજાકૃતિઃ ।
ધનં ધનપતેર્બન્ધુર્ધનદો ધરણીધરઃ ॥ ૯૩॥
ધ્યાનૈકપ્રકટો ધ્યેયો ધ્યાનં ધ્યાનપરાયણઃ ।
ધ્વનિપ્રકૃતિચીત્કારો બ્રહ્માણ્ડાવલિમેખલઃ ॥ ૯૪॥
નન્દ્યો નન્દિપ્રિયો નાદો નાદમધ્યપ્રતિષ્ઠિતઃ ।
નિષ્કલો નિર્મલો નિત્યો નિત્યાનિત્યો નિરામયઃ ॥ ૯૫॥
પરં વ્યોમ પરં ધામ પરમાત્મા પરં પદમ્ ॥ ૯૬॥
પરાત્પરઃ પશુપતિઃ પશુપાશવિમોચનઃ ।
પૂર્ણાનન્દઃ પરાનન્દઃ પુરાણપુરુષોત્તમઃ ॥ ૯૭॥
પદ્મપ્રસન્નવદનઃ પ્રણતાજ્ઞાનનાશનઃ ।
પ્રમાણપ્રત્યયાતીતઃ પ્રણતાર્તિનિવારણઃ ॥ ૯૮॥
ફણિહસ્તઃ ફણિપતિઃ ફૂત્કારઃ ફણિતપ્રિયઃ ।
બાણાર્ચિતાઙ્ઘ્રિયુગલો બાલકેલિકુતૂહલી ।
બ્રહ્મ બ્રહ્માર્ચિતપદો બ્રહ્મચારી બૃહસ્પતિઃ ॥ ૯૯॥
બૃહત્તમો બ્રહ્મપરો બ્રહ્મણ્યો બ્રહ્મવિત્પ્રિયઃ ।

બૃહન્નાદાગ્ર્યચીત્કારો બ્રહ્માણ્ડાવલિમેખલઃ ॥ ૧૦૦॥
ભ્રૂક્ષેપદત્તલક્ષ્મીકો ભર્ગો ભદ્રો ભયાપહઃ ।
ભગવાન્ ભક્તિસુલભો ભૂતિદો ભૂતિભૂષણઃ ॥ ૧૦૧॥
ભવ્યો ભૂતાલયો ભોગદાતા ભ્રૂમધ્યગોચરઃ ।
મન્ત્રો મન્ત્રપતિર્મન્ત્રી મદમત્તો મનો મયઃ ॥ ૧૦૨॥
મેખલાહીશ્વરો મન્દગતિર્મન્દનિભેક્ષણઃ ।
(var  મેખલાવાન્ મન્દગતિર્મતિમત્કમલેક્ષણઃ ।)
મહાબલો મહાવીર્યો મહાપ્રાણો મહામનાઃ ॥ ૧૦૩॥
યજ્ઞો યજ્ઞપતિર્યજ્ઞગોપ્તા યજ્ઞફલપ્રદઃ ।
યશસ્કરો યોગગમ્યો યાજ્ઞિકો યાજકપ્રિયઃ ॥ ૧૦૪॥
રસો રસપ્રિયો રસ્યો રઞ્જકો રાવણાર્ચિતઃ ।
રાજ્યરક્ષાકરો રત્નગર્ભો રાજ્યસુખપ્રદઃ ॥ ૧૦૫॥
લક્ષો લક્ષપતિર્લક્ષ્યો લયસ્થો લડ્ડુકપ્રિયઃ ।
લાસપ્રિયો લાસ્યપરો લાભકૃલ્લોકવિશ્રુતઃ ॥ ૧૦૬॥
વરેણ્યો વહ્નિવદનો વન્દ્યો વેદાન્તગોચરઃ ।
વિકર્તા વિશ્વતશ્ચક્ષુર્વિધાતા વિશ્વતોમુખઃ ॥ ૧૦૭॥
વામદેવો વિશ્વનેતા વજ્રિવજ્રનિવારણઃ ।
વિવસ્વદ્બન્ધનો વિશ્વાધારો વિશ્વેશ્વરો વિભુઃ ॥ ૧૦૮॥
(વિશ્વબન્ધન વિષ્કમ્ભાધારો વિશ્વેશ્વરપ્રભુઃ)

શબ્દબ્રહ્મ શમપ્રાપ્યઃ શમ્ભુશક્તિગણેશ્વરઃ ।
શાસ્તા શિખાગ્રનિલયઃ શરણ્યઃ શમ્બરેશ્વરઃ ॥ ૧૦૯॥
ષડૃતુકુસુમસ્રગ્વી ષડાધારઃ ષડક્ષરઃ ।
સંસારવૈદ્યઃ સર્વજ્ઞઃ સર્વભેષજભેષજમ્ ॥ ૧૧૦॥
સૃષ્ટિસ્થિતિલયક્રીડઃ સુરકુઞ્જરભેદકઃ ।
સિન્દૂરિતમહાકુમ્ભઃ સદસદ્ભક્તિદાયકઃ ॥ ૧૧૧॥
સાક્ષી સમુદ્રમથનઃ સ્વયંવેદ્યઃ સ્વદક્ષિણઃ ।
સ્વતન્ત્રઃ સત્યસઙ્કલ્પઃ સામગાનરતઃ સુખી ॥ ૧૧૨॥
હંસો હસ્તિપિશાચીશો હવનં હવ્યકવ્યભુક્ ।
હવ્યં હુતપ્રિયો હૃષ્ટો હૃલ્લેખામન્ત્રમધ્યગઃ ॥ ૧૧૩॥
ક્ષેત્રાધિપઃ ક્ષમાભર્તા ક્ષમાક્ષમપરાયણઃ ।
ક્ષિપ્રક્ષેમકરઃ ક્ષેમાનન્દઃ ક્ષોણીસુરદ્રુમઃ ॥ ૧૧૪॥

end of MatrikA prefix names
ધર્મપ્રદોઽર્થદઃ કામદાતા સૌભાગ્યવર્ધનઃ ।
વિદ્યાપ્રદો વિભવદો ભુક્તિમુક્તિફલપ્રદઃ ॥ ૧૧૫ ॥
આભિરૂપ્યકરો વીરશ્રીપ્રદો વિજયપ્રદઃ ।
સર્વવશ્યકરો ગર્ભદોષહા પુત્રપૌત્રદઃ ॥ ૧૧૬ ॥
મેધાદઃ કીર્તિદઃ શોકહારી દૌર્ભાગ્યનાશનઃ ।
પ્રતિવાદિમુખસ્તમ્ભો રુષ્ટચિત્તપ્રસાદનઃ ॥ ૧૧૭ ॥
પરાભિચારશમનો દુઃખહા બન્ધમોક્ષદઃ ।
લવસ્ત્રુટિઃ કલા કાષ્ઠા નિમેષસ્તત્પરક્ષણઃ ॥ ૧૧૮ ॥
ઘટી મુહૂર્તઃ પ્રહરો દિવા નક્તમહર્નિશમ્ ।
પક્ષો માસર્ત્વયનાબ્દયુગં કલ્પો મહાલયઃ ॥ ૧૧૯ ॥
રાશિસ્તારા તિથિર્યોગો વારઃ કરણમંશકમ્ ।
લગ્નં હોરા કાલચક્રં મેરુઃ સપ્તર્ષયો ધ્રુવઃ ॥ ૧૨૦ ॥
રાહુર્મન્દઃ કવિર્જીવો બુધો ભૌમઃ શશી રવિઃ ।
કાલઃ સૃષ્ટિઃ સ્થિતિર્વિશ્વં સ્થાવરં જઙ્ગમં જગત્ ॥ ૧૨૧ ॥
ભૂરાપોઽગ્નિર્મરુદ્વ્યોમાહંકૃતિઃ પ્રકૃતિઃ પુમાન્ ।
બ્રહ્મા વિષ્ણુઃ શિવો રુદ્ર ઈશઃ શક્તિઃ સદાશિવઃ ॥ ૧૨૨ ॥
ત્રિદશાઃ પિતરઃ સિદ્ધા યક્ષા રક્ષાંસિ કિન્નરાઃ ।
સિદ્ધવિદ્યાધરા ભૂતા મનુષ્યાઃ પશવઃ ખગાઃ ॥ ૧૨૩ ॥
સમુદ્રાઃ સરિતઃ શૈલા ભૂતં ભવ્યં ભવોદ્ભવઃ ।
સાઙ્ખ્યં પાતઞ્જલં યોગં પુરાણાનિ શ્રુતિઃ સ્મૃતિઃ ॥ ૧૨૪ ॥
વેદાઙ્ગાનિ સદાચારો મીમાંસા ન્યાયવિસ્તરઃ ।
આયુર્વેદો ધનુર્વેદો ગાન્ધર્વં કાવ્યનાટકમ્ ॥ ૧૨૫ ॥
વૈખાનસં ભાગવતં માનુષં પાઞ્ચરાત્રકમ્ ।
શૈવં પાશુપતં કાલામુખમ્ભૈરવશાસનમ્ ॥ ૧૨૬ ॥
શાક્તં વૈનાયકં સૌરં જૈનમાર્હતસંહિતા ।
સદસદ્વ્યક્તમવ્યક્તં સચેતનમચેતનમ્ ॥ ૧૨૭ ॥
બન્ધો મોક્ષઃ સુખં ભોગો યોગઃ સત્યમણુર્મહાન્ ।
સ્વસ્તિ હું ફટ્ સ્વધા સ્વાહા શ્રૌષડ્ વૌષડ્ વષણ્ણમઃ ॥ ૧૨૮ ॥
જ્ઞાનં વિજ્ઞાનમાનન્દો બોધઃ સંવિત્સમોઽસમઃ ।
એક એકાક્ષરાધાર એકાક્ષરપરાયણઃ ॥ ૧૨૯ ॥
એકાગ્રધીરેકવીર એકોઽનેકસ્વરૂપધૃક્ ।

દ્વિરૂપો દ્વિભુજો દ્વ્યક્ષો દ્વિરદો દ્વીપરક્ષકઃ ॥ ૧૩૦॥
દ્વૈમાતુરો દ્વિવદનો દ્વન્દ્વહીનો દ્વયાતિગઃ ।
ત્રિધામા ત્રિકરસ્ત્રેતા ત્રિવર્ગફલદાયકઃ ॥ ૧૩૧॥
ત્રિગુણાત્મા ત્રિલોકાદિસ્ત્રિશક્તીશસ્ત્રિલોચનઃ ।
ચતુર્વિધવચોવૃત્તિપરિવૃત્તિપ્રવર્તકઃ ॥ ૧૩૨॥
ચતુર્બાહુશ્ચતુર્દન્તશ્ચતુરાત્મા ચતુર્ભુજઃ ।
ચતુર્વિધોપાયમયશ્ચતુર્વર્ણાશ્રમાશ્રયઃ ।
ચતુર્થીપૂજનપ્રીતશ્ચતુર્થીતિથિસમ્ભવઃ ॥ ૧૩૩॥
પઞ્ચાક્ષરાત્મા પઞ્ચાત્મા પઞ્ચાસ્યઃ પઞ્ચકૃત્તમઃ ॥ ૧૩૪॥
પઞ્ચાધારઃ પઞ્ચવર્ણઃ પઞ્ચાક્ષરપરાયણઃ ।
પઞ્ચતાલઃ પઞ્ચકરઃ પઞ્ચપ્રણવમાતૃકઃ ॥ ૧૩૫॥ (પઞ્ચપ્રણવમાતૃકઃ)

પઞ્ચબ્રહ્મમયસ્ફૂર્તિઃ પઞ્ચાવરણવારિતઃ ।
પઞ્ચભક્ષપ્રિયઃ પઞ્ચબાણઃ પઞ્ચશિખાત્મકઃ ॥ ૧૩૬॥
ષટ્કોણપીઠઃ ષટ્ચક્રધામા ષડ્ગ્રન્થિભેદકઃ ।
ષડઙ્ગધ્વાન્તવિધ્વંસી ષડઙ્ગુલમહાહ્રદઃ ॥ ૧૩૭॥ (ષડધ્વધ્વાન્ત, મહાહૃદઃ)

ષણ્મુખઃ ષણ્મુખભ્રાતા ષટ્શક્તિપરિવારિતઃ ।
ષડ્વૈરિવર્ગવિધ્વંસી ષડૂર્મિભયભઞ્જનઃ ॥ ૧૩૮॥
ષટ્તર્કદૂરઃ ષટ્કર્મા ષડ્ગુણઃ ષડ્રસાશ્રયઃ ।
સપ્તપાતાલચરણઃ સપ્તદ્વીપોરુમણ્ડલઃ ॥ ૧૩૯॥
સપ્તસ્વર્લોકમુકુટઃ સપ્તસપ્તિવરપ્રદઃ ।
સપ્તાઙ્ગરાજ્યસુખદઃ સપ્તર્ષિગણવન્દિતઃ ॥ ૧૪૦॥
સપ્તચ્છન્દોનિધિઃ સપ્તહોત્રઃ સપ્તસ્વરાશ્રયઃ ।
સપ્તાબ્ધિકેલિકાસારઃ સપ્તમાતૃનિષેવિતઃ ॥ ૧૪૧॥
સપ્તચ્છન્દો મોદમદઃ સપ્તચ્છન્દો મખપ્રભુઃ ।
અષ્ટમૂર્તિર્ધ્યેયમૂર્તિરષ્ટપ્રકૃતિકારણમ્ ॥ ૧૪૨॥
અષ્ટાઙ્ગયોગફલભૃદષ્ટપત્રામ્બુજાસનઃ ।
અષ્ટશક્તિસમાનશ્રીરષ્ટૈશ્વર્યપ્રવર્ધનઃ ॥ ૧૪૩॥
અષ્ટપીઠોપપીઠશ્રીરષ્ટમાતૃસમાવૃતઃ ।
અષ્ટભૈરવસેવ્યોઽષ્ટવસુવન્દ્યોઽષ્ટમૂર્તિભૃત્ ॥ ૧૪૪॥
અષ્ટચક્રસ્ફુરન્મૂર્તિરષ્ટદ્રવ્યહવિઃપ્રિયઃ ।
અષ્ટશ્રીરષ્ટસામશ્રીરષ્ટૈશ્વર્યપ્રદાયકઃ ।

નવનાગાસનાધ્યાસી નવનિધ્યનુશાસિતઃ ॥ ૧૪૫ ॥
નવદ્વારપુરાવૃત્તો નવદ્વારનિકેતનઃ । (નવદ્વારપુરાધારો)
નવનાથમહાનાથો નવનાગવિભૂષિતઃ ॥ ૧૪૬ ॥
નવનારાયણસ્તુલ્યો નવદુર્ગાનિષેવિતઃ ।
નવરત્નવિચિત્રાઙ્ગો નવશક્તિશિરોદ્ધૃતઃ ॥ ૧૪૭ ॥
દશાત્મકો દશભુજો દશદિક્પતિવન્દિતઃ ।
દશાધ્યાયો દશપ્રાણો દશેન્દ્રિયનિયામકઃ ॥ ૧૪૮ ॥
દશાક્ષરમહામન્ત્રો દશાશાવ્યાપિવિગ્રહઃ ।
એકાદશમહારુદ્રૈઃસ્તુતશ્ચૈકાદશાક્ષરઃ ॥ ૧૪૯ ॥
દ્વાદશદ્વિદશાષ્ટાદિદોર્દણ્ડાસ્ત્રનિકેતનઃ ।
ત્રયોદશભિદાભિન્નો વિશ્વેદેવાધિદૈવતમ્ ॥ ૧૫૦ ॥
ચતુર્દશેન્દ્રવરદશ્ચતુર્દશમનુપ્રભુઃ ।
ચતુર્દશાદ્યવિદ્યાઢ્યશ્ચતુર્દશજગત્પતિઃ ॥ ૧૫૧ ॥
સામપઞ્ચદશઃ પઞ્ચદશીશીતાંશુનિર્મલઃ ।
તિથિપઞ્ચદશાકારસ્તિથ્યા પઞ્ચદશાર્ચિતઃ ॥ ૧૫૨ ॥
ષોડશાધારનિલયઃ ષોડશસ્વરમાતૃકઃ ।
ષોડશાન્તપદાવાસઃ ષોડશેન્દુકલાત્મકઃ ॥ ૧૫૩ ॥
કલાસપ્તદશી સપ્તદશસપ્તદશાક્ષરઃ ।
અષ્ટાદશદ્વીપપતિરષ્ટાદશપુરાણકૃત્ ॥ ૧૫૪ ॥
અષ્ટાદશૌષધીસૃષ્ટિરષ્ટાદશવિધિઃ સ્મૃતઃ ।
અષ્ટાદશલિપિવ્યષ્ટિસમષ્ટિજ્ઞાનકોવિદઃ ॥ ૧૫૫ ॥
અષ્ટાદશાન્નસમ્પત્તિરષ્ટાદશવિજાતિકૃત્ ।
એકવિંશઃ પુમાનેકવિંશત્યઙ્ગુલિપલ્લવઃ ॥ ૧૫૬ ॥
ચતુર્વિંશતિતત્ત્વાત્મા પઞ્ચવિંશાખ્યપૂરુષઃ ।
સપ્તવિંશતિતારેશઃ સપ્તવિંશતિયોગકૃત્ ॥ ૧૫૭ ॥
દ્વાત્રિંશદ્ભૈરવાધીશશ્ચતુસ્ત્રિંશન્મહાહ્રદઃ ।
ષટ્ત્રિંશત્તત્ત્વસમ્ભૂતિરષ્ટત્રિંશત્કલાત્મકઃ ॥ ૧૫૮ ॥
પઞ્ચાશદ્વિષ્ણુશક્તીશઃ પઞ્ચાશન્માતૃકાલયઃ ।
દ્વિપઞ્ચાશદ્વપુઃશ્રેણીત્રિષષ્ટ્યક્ષરસંશ્રયઃ ।
પઞ્ચાશદક્ષરશ્રેણીપઞ્ચાશદ્રુદ્રવિગ્રહઃ ॥ ૧૫૯ ॥
ચતુઃષષ્ટિમહાસિદ્ધિયોગિનીવૃન્દવન્દિતઃ ।
નમદેકોનપઞ્ચાશન્મરુદ્વર્ગનિરર્ગલઃ ॥ ૧૬૦ ॥

ચતુઃષષ્ટ્યર્થનિર્ણેતા ચતુઃષષ્ટિકલાનિધિઃ ।
અષ્ટષષ્ટિમહાતીર્થક્ષેત્રભૈરવવન્દિતઃ ॥ ૧૬૧॥
ચતુર્નવતિમન્ત્રાત્મા ષણ્ણવત્યધિકપ્રભુઃ ।
શતાનન્દઃ શતધૃતિઃ શતપત્રાયતેક્ષણઃ ॥ ૧૬૨॥
શતાનીકઃ શતમખઃ શતધારાવરાયુધઃ ।
સહસ્રપત્રનિલયઃ સહસ્રફણિભૂષણઃ ॥ ૧૬૩॥
સહસ્રશીર્ષા પુરુષઃ સહસ્રાક્ષઃ સહસ્રપાત્ ।
સહસ્રનામસંસ્તુત્યઃ સહસ્રાક્ષબલાપહઃ ॥ ૧૬૪॥
દશસાહસ્રફણિભૃત્ફણિરાજકૃતાસનઃ ।
અષ્ટાશીતિસહસ્રાદ્યમહર્ષિસ્તોત્રપાઠિતઃ ॥ ૧૬૫॥
લક્ષાધારઃ પ્રિયાધારો લક્ષાધારમનોમયઃ ।
ચતુર્લક્ષજપપ્રીતશ્ચતુર્લક્ષપ્રકાશકઃ ॥ ૧૬૬॥
ચતુરશીતિલક્ષાણાં જીવાનાં દેહસંસ્થિતઃ ।
કોટિસૂર્યપ્રતીકાશઃ કોટિચન્દ્રાંશુનિર્મલઃ ॥ ૧૬૭॥
શિવોદ્ભવાદ્યષ્ટકોટિવૈનાયકધુરન્ધરઃ । (વિનાયકધુરન્ધરઃ)
સપ્તકોટિમહામન્ત્રમન્ત્રિતાવયવદ્યુતિઃ ॥ ૧૬૮॥
ત્રયસ્ત્રિંશત્કોટિસુરશ્રેણીપ્રણતપાદુકઃ ।
અનન્તદેવતાસેવ્યો હ્યનન્તશુભદાયકઃ ॥ ૧૬૯॥
અનન્તનામાનન્તશ્રીરનન્તોઽનન્તસૌખ્યદઃ ।
અનન્તશક્તિસહિતો હ્યનન્તમુનિસંસ્તુતઃ ॥ ૧૭૦॥
અનન્તમુનિસંસ્તુત ૐ નમ ઇતિ ।

ઇતિ વૈનાયકં નામ્નાં સહસ્રમિદમીરિતમ્ ।
ઇદં બ્રાહ્મે મુહૂર્તે યઃ પઠતિ પ્રત્યહં નરઃ ॥ ૧૭૧॥
કરસ્થં તસ્ય સકલમૈહિકામુષ્મિકં સુખમ્ ।
આયુરારોગ્યમૈશ્વર્યં ધૈર્યં શૌર્યં બલં યશઃ ॥ ૧૭૨॥
મેધા પ્રજ્ઞા ધૃતિઃ કાન્તિઃ સૌભાગ્યમભિરૂપતા ।
સત્યં દયા ક્ષમા શાન્તિર્દાક્ષિણ્યં ધર્મશીલતા ॥ ૧૭૩॥
જગત્સંવનનં વિશ્વસંવાદો વેદપાટવમ્ ।
સભાપાણ્ડિત્યમૌદાર્યં ગામ્ભીર્યં બ્રહ્મવર્ચસમ્ ॥ ૧૭૪॥
ઓજસ્તેજઃ કુલં શીલં પ્રતાપો વીર્યમાર્યતા ।
જ્ઞાનં વિજ્ઞાનમાસ્તિક્યં સ્થૈર્યં વિશ્વાસતા તથા ॥ ૧૭૫॥

ધનધાન્યાદિવૃદ્ધિશ્ચ સકૃદસ્ય જપાદ્ભવેત્ ।
વશ્યં ચતુર્વિધં વિશ્વં જપાદસ્ય પ્રજાયતે ॥ ૧૭૬॥
રાજ્ઞો રાજકલત્રસ્ય રાજપુત્રસ્ય મન્ત્રિણઃ ।
જપ્યતે યસ્ય વશ્યાર્થે સ દાસસ્તસ્ય જાયતે ॥ ૧૭૭॥
ધર્માર્થકામમોક્ષાણામનાયાસેન સાધનમ્ ।
શાકિનીડાકિનીરક્ષોયક્ષગ્રહભયાપહમ્ ॥ ૧૭૮॥
સામ્રાજ્યસુખદં સર્વસપત્નમદમર્દનમ્ ।
સમસ્તકલહધ્વંસિ દગ્ધબીજપ્રરોહણમ્ ॥ ૧૭૯॥
દુઃસ્વપ્નશમનં ક્રુદ્ધસ્વામિચિત્તપ્રસાદનમ્ ।
ષડ્વર્ગાષ્ટમહાસિદ્ધિત્રિકાલજ્ઞાનકારણમ્ ॥ ૧૮૦॥
પરકૃત્યપ્રશમનં પરચક્રપ્રમર્દનમ્ ।
સઙ્ગ્રામમાર્ગે સર્વેષામિદમેકં જયાવહમ્ ॥ ૧૮૧॥
સર્વવન્ધ્યત્વદોષઘ્નં ગર્ભરક્ષૈકકારણમ્ ।
પઠ્યતે પ્રત્યહં યત્ર સ્તોત્રં ગણપતેરિદમ્ ॥ ૧૮૨॥
દેશે તત્ર ન દુર્ભિક્ષમીતયો દુરિતાનિ ચ ।
ન તદ્ગેહં જહાતિ શ્રીર્યત્રાયં જપ્યતે સ્તવઃ ॥ ૧૮૩॥
ક્ષયકુષ્ઠપ્રમેહાર્શભગન્દરવિષૂચિકાઃ ।
ગુલ્મં પ્લીહાનમશમાનમતિસારં મહોદરમ્ ॥ ૧૮૪॥
કાસં શ્વાસમુદાવર્તં શૂલં શોફામયોદરમ્ ।
શિરોરોગં વમિં હિક્કાં ગણ્ડમાલામરોચકમ્ ॥ ૧૮૫॥
વાતપિત્તકફદ્વન્દ્વત્રિદોષજનિતજ્વરમ્ ।
આગન્તુવિષમં શીતમુષ્ણં ચૈકાહિકાદિકમ્ ॥ ૧૮૬॥
ઇત્યાદ્યુક્તમનુક્તં વા રોગદોષાદિસમ્ભવમ્ ।
સર્વં પ્રશમયત્યાશુ સ્તોત્રસ્યાસ્ય સકૃજ્જપઃ ॥ ૧૮૭॥
પ્રાપ્યતેઽસ્ય જપાત્સિદ્ધિઃ સ્ત્રીશૂદ્રૈઃ પતિતૈરપિ ।
સહસ્રનામમન્ત્રોઽયં જપિતવ્યઃ શુભાપ્તયે ॥ ૧૮૮॥
મહાગણપતેઃ સ્તોત્રં સકામઃ પ્રજપન્નિદમ્ ।
ઇચ્છયા સકલાન્ ભોગાનુપભુજ્યેહ પાર્થિવાન્ ॥ ૧૮૯॥
મનોરથફલૈર્દિવ્યૈર્વ્યોમયાનૈર્મનોરમૈઃ ।
ચન્દ્રેન્દ્રભાસ્કરોપેન્દ્રબ્રહ્મશર્વાદિસદ્મસુ ॥ ૧૯૦॥
કામરૂપઃ કામગતિઃ કામદઃ કામદેશ્વરઃ ।
ભુક્ત્વા યથેપ્સિતાન્ભોગાનભીષ્ટૈઃ સહ બન્ધુભિઃ ॥ ૧૯૧॥

ગણેશાનુચરો ભૂત્વા ગણો ગણપતિપ્રિયઃ ।
નન્દીશ્વરાદિસાનન્દૈર્નન્દિતઃ સકલૈર્ગણૈઃ ॥ ૧૯૨॥
શિવાભ્યાં કૃપયા પુત્રનિર્વિશેષં ચ લાલિતઃ ।
શિવભક્તઃ પૂર્ણકામો ગણેશ્વરવરાત્પુનઃ ॥ ૧૯૩॥
જાતિસ્મરો ધર્મપરઃ સાર્વભૌમોઽભિજાયતે ।
નિષ્કામસ્તુ જપન્નિત્યં ભક્ત્યા વિઘ્નેશતત્પરઃ ॥ ૧૯૪॥
યોગસિદ્ધિં પરાં પ્રાપ્ય જ્ઞાનવૈરાગ્યસંયુતઃ ।
નિરન્તરે નિરાબાધે પરમાનન્દસંજ્ઞિતે ॥ ૧૯૫॥ (નિરન્તરોદિતાનન્દે પરમાનન્દસંવિદિ)

વિશ્વોત્તીર્ણે પરે પૂર્ણે પુનરાવૃત્તિવર્જિતે ।
લીનો વૈનાયકે ધામ્નિ રમતે નિત્યનિર્વૃતે ॥ ૧૯૬॥
યો નામભિર્હુતૈર્દત્તૈઃ પૂજયેદર્ચયેન્નરઃ । (યો નામભિઃ સહસ્રૈર્મામર્ચયેદ્ જુહુયાન્નરઃ)
રાજાનો વશ્યતાં યાન્તિ રિપવો યાન્તિ દાસતામ્ ॥ ૧૯૭॥
તસ્ય સિધ્યન્તિ મન્ત્રાણાં દુર્લભાશ્ચેષ્ટસિદ્ધયઃ ।
મૂલમન્ત્રાદપિ સ્તોત્રમિદં પ્રિયતમં મમ ॥ ૧૯૮॥
નભસ્યે માસિ શુક્લાયાં ચતુર્થ્યાં મમ જન્મનિ ।
દૂર્વાભિર્નામભિઃ પૂજાં તર્પણં વિધિવચ્ચરેત્ ॥ ૧૯૯॥
અષ્ટદ્રવ્યૈર્વિશેષેણ કુર્યાદ્ભક્તિસુસંયુતઃ ।
તસ્યેપ્સિતં ધનં ધાન્યમૈશ્વર્યં વિજયો યશઃ ॥ ૨૦૦॥
ભવિષ્યતિ ન સન્દેહઃ પુત્રપૌત્રાદિકં સુખમ્ ।
ઇદં પ્રજપિતં સ્તોત્રં પઠિતં શ્રાવિતં શ્રુતમ્ ॥ ૨૦૧॥
વ્યાકૃતં ચર્ચિતં ધ્યાતં વિમૃષ્ટમભિવન્દિતમ્ ।
ઇહામુત્ર ચ વિશ્વેષાં વિશ્વૈશ્વર્યપ્રદાયકમ્ ॥ ૨૦૨॥ (સર્વેષાં સર્વૈશ્વર્યપ્રદાયકમ્)
સ્વચ્છન્દચારિણાપ્યેષ યેન સન્ધાર્યતે સ્તવઃ ।
સ રક્ષ્યતે શિવોદ્ભૂતૈર્ગણૈરધ્યષ્ટકોટિભિઃ ॥ ૨૦૩॥
લિખિતં પુસ્તકસ્તોત્રં મન્ત્રભૂતં પ્રપૂજયેત્ ।
તત્ર સર્વોત્તમા લક્ષ્મીઃ સન્નિધત્તે નિરન્તરમ્ ॥ ૨૦૪॥
દાનૈરશેષૈરખિલૈર્વ્રતૈશ્ચ
    તીર્થૈરશેષૈરખિલૈર્મખૈશ્ચ ।
ન તત્ફલં વિન્દતિ યદ્ગણેશ-
    સહસ્રનામસ્મરણેન સદ્યઃ ॥ ૨૦૫॥
એતન્નામ્નાં સહસ્રં પઠતિ દિનમણૌ પ્રત્યહં

પ્રોજ્જિહાને સાયં મધ્યન્દિને વા
ત્રિષવણમથવા સન્તતં વા જનો યઃ ।
સ સ્યાદૈશ્વર્યધુર્યઃ પ્રભવતિ વચસાં
કીર્તિમુચ્ચૈસ્તનોતિ દારિદ્ર્યં હન્તિ વિશ્વં
વશયતિ સુચિરં વર્ધતે પુત્રપૌત્રૈઃ ॥ ૨૦૬॥
અકિઞ્ચનોઽપ્યેકચિત્તો નિયતો નિયતાસનઃ ।
પ્રજપંશ્ચતુરો માસાન્ ગણેશાર્ચનતત્પરઃ ॥ ૨૦૭॥
દરિદ્રતાં સમુન્મૂલ્ય સપ્તજન્માનુગામપિ ।
લભતે મહતીં લક્ષ્મીમિત્યાજ્ઞા પારમેશ્વરી ॥ ૨૦૮॥
આયુષ્યં વીતરોગં કુલમતિવિમલં સમ્પદશ્ચાર્તિનાશઃ var ચાર્તદાનાઃ
કીર્તિર્નિત્યાવદાતા ભવતિ ખલુ નવા કાન્તિરવ્યાજભવ્યા । var ભણિતિરભિનવા
પુત્રાઃ સન્તઃ કલત્રં ગુણવદભિમતં યદ્યદન્યચ્ચ તત્તન્ var સત્યં
નિત્યં યઃ સ્તોત્રમેતત્ પઠતિ ગણપતેસ્તસ્ય હસ્તે સમસ્તમ્ ॥ ૨૦૯॥

ૐ ગણઞ્જયો ગણપતિર્હેરમ્બો ધરણીધરઃ । start of 21 names
મહાગણપતિર્બુદ્ધિપ્રિયઃ ક્ષિપ્રપ્રસાદનઃ ॥ ૨૧૦॥ var ગણપતિર્લક્ષપ્રદઃ

અમોઘસિદ્ધિરમૃતમન્ત્રશ્ચિન્તામણિર્નિધિઃ ।
સુમઙ્ગલો બીજમાશાપૂરકો વરદઃ કલઃ ॥ ૨૧૧॥ var વરદઃ શિવઃ

કાશ્યપો નન્દનો વાચાસિદ્ધો ઢુણ્ઢિર્વિનાયકઃ ।
મોદકૈરેભિરત્રૈકવિંશત્યા નામભિઃ પુમાન્ ॥ ૨૧૨॥
ઉપાયનં દદેદ્ભક્ત્યા મત્પ્રસાદં ચિકીર્ષતિ ।
વત્સરં વિઘ્નરાજોઽસ્ય તથ્યમિષ્ટાર્થસિદ્ધયે ॥ ૨૧૩॥
યઃ સ્તૌતિ મદ્ગતમના મમારાધનતત્પરઃ ।
સ્તુતો નામ્ના સહસ્રેણ તેનાહં નાત્ર સંશયઃ ॥ ૨૧૪॥
નમો નમઃ સુરવરપૂજિતાઙ્ઘ્રયે
    નમો નમો નિરુપમમઙ્ગલાત્મને ।
નમો નમો વિપુલદયૈકસિદ્ધયે
    નમો નમઃ કરિકલભાનનાય તે ॥ ૨૧૫॥
કિઙ્કિણીગણરચિતચરણઃ
પ્રકટિતગુરુમિતચારુકરણઃ ।
મદજલલહરીકલિતકપોલઃ
શમયતુ દુરિતં ગણપતિનામ્ના ॥ ૨૧૬॥

॥ ઇતિ શ્રીગણેશપુરાણે ઉપાસનાખણ્ડે ઈશ્વરગણેશસંવાદે
ગણેશસહસ્રનામસ્તોત્રં નામ ષટ્ચત્વારિંશોઽધ્યાયઃ ॥

- ॥ શ્રીગણેશપુરાણં ઉપાસના (પૂર્વ)ખણ્ડ । અધ્યાય ૪૬ । ૧.૪૬ ૧-૨૨૩ ॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDa . adhyAya 46 . 1.46 1-223..

Encoded by M. Suresh msuresh at altavista.net
Expanded and corrected by Kirk Wortman, Preeti Bhandare

*Mahaganapati Sahasranama Stotram 1*
pdf was typeset on February 28, 2025

Please send corrections to *sanskrit@cheerful.com*